न्। उप। अगां। अर्वाक्। त्वा। परेभ्यः। परः। अवरेभ्यः॥४९॥ तं। त्वा। जु
महे। देव। वनस्पते। देवयज्यायाऽइतिदेवऽयज्यायै। देवाः। त्वा। देवयज्याया
इतिदेवऽयज्यायै। जुषंतां। विष्णवे। त्वा॥५०॥ ओषधे। त्रायस्व। स्वधितेइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वऽधिते। मा। एनम्। मा। हिंसीः। दिवम्। मा। लेखीः। अन्तरिक्षम्।
मा। हिंसीः। पृथिव्या। सम्। भव। ।५।। अयम्। हि। त्वा। स्वधि
तिः। स्वऽधितिः। तेतिजानः। प्रणिनाय। प्रनिनायेति प्रऽनि
नाय। महते। सौभगाय। अतः। त्वम्। देव। वनस्पते। शतवल्श इ
ति शतऽवल्शः। वि। रोह। सहस्रवल्शा इति सहस्रऽवल्शाः।
वि। वयम्। रुहेम।। ६।। ४।। [illegible] ।। ४।। ओम्। अग्रेणीः।
अग्रेनीरित्यग्रेऽनीः। असि। स्वावेश इति सुऽआवेशः। उन्नेतृ
णामित्युत्ऽनेतृणाम्। एतस्य। वित्तात्। अधि। त्वा। स्थास्यति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवः। त्वा। सविता। मध्वा। अनक्तु। सुपिप्पलाः। इति सुऽपि
प्पलाभ्यः। त्वा। ओषधीभ्यः। दिवं। अग्रेण। अस्पृक्षः। आ। अं
तरिक्षं। मध्येन। अप्राः। पृथिवीं। उपरेण। अदृंहीः॥१॥ या।
ते। धामानि। उश्मसि। गमध्यै। यत्र। गावः। भूरिशृंगाः इति भूरि
ऽशृंगाः। अयासः। अत्र। अह। तत्। उरुगायस्येत्युरुऽगाय
स्य। विष्णोः। परमं। पदं। अव। भाति। भूरि। ब्रह्मवनि त्वा। ब्र
अदृंहत्॥२॥ विष्णोः। कर्माणि। पश्यत। यतः। व्रतानि। पस्पशे।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रस्य । युज्यः । सखा ॥ ४ ॥ तत् । विष्णोः । परमं । पदं । सदा । पश्यं
ति । सूरयः ॥ दीवीवेति दिविऽइव । चक्षुः । आततमित्याऽततं ॥ ५ ॥
परिवीरसीति परिऽवीः । असि । परि । त्वा । देवीः । विशः । व्ययंतां
परि । इमं । यजमानं । रायः । मनुष्याणां ॥ दिवः । सूनुः । असि । इ
षः । ते । पृथिव्यां ॥ लोकः । आरण्यः । ते । पशुः ॥ ६ ॥ उपावीरित्युप
ऽअवीः । असि । उप । देवान् । दैवीः । विशः । प्र । अगुः । उ
शिजः । वन्हितमानिति वन्हिऽतमान् । देव । त्वष्टः । वसु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमाहव्या। ते। स्वदंतां। ७॥ रेवतीः। रमध्वं। बृहस्पते। धा
रय। वसूनि। ऋतस्य। त्वा। देवहविः। इति देवऽहविः। पाशेन।
प्रति। मुंचामि। धर्षा। मानुषः। देवस्य। त्वा। ८॥ अग्नीषो
माभ्यां। जुष्टं। नि। युनज्मि। अद्भ्यः। त्वा। ओष
धीभ्यः। प्र। उक्षामि॥ ९॥ अपां। पेरुः। असि। आपः। देवीः।
स्वदंतु। स्वात्तं। चित्। सत्। देवहविः। इति देवऽहविः॥ १०॥ सं
ते। प्राणः। वातेन। गच्छतां। सं। अंगानि। यजत्रैः। सं। यज्ञऽप
तिः। आशिषा। सऽआशिषा॥ ११॥ घृतेन। अक्तौ। पशून्। त्रायेथां।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

रेवति। यजमाने। प्रियं। धाः। आ। विश। उरोः। अन्तरिक्षा
त्। सजुरिति सऽजूः। देवेन। वातेन। अस्य। हविषः। त्म
ना। यज। सं। अस्य। तन्वा। भव॥ ६॥ वर्षो इति वर्षो। वर्षी
यसि। यज्ञे। यज्ञपतिमिति यज्ञऽपतिं। धाः। स्वाहा। देवेभ्यः।
देवेभ्यः। स्वाहा॥ मा। अहिः। भूः। मा। पृदाकुः॥ ७॥ नमः। ते।
आतानेत्याऽतान। अनर्वा। प्र। इहि। घृतस्य। कुल्याः। उप।
ऋतस्य। पथ्याः। अनु॥ देवीः। आपः। शुद्धाः। वोढ्वं। सु
परिविष्टा इति सुऽपरिविष्टाः। देवेषु। सुपरिविष्टा इति सुऽपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्टाः। देवेषु। सुपविष्टाऽइतिसुऽपरिविष्टाः। वयं। परि
वेष्टारऽइतिपरिऽवेष्टारः। अस्मा। १५। वाचं। ते। शु
धामि। प्राणं। चक्षुः। श्रोत्रं। नाभिं। मेढ्रं। पायुं। चरित्रा
ऽन्ते। शुंधामि। १४। मनः। ते। आ। प्यायतां। वाक्। ते। प्रा
णः। चक्षुः। श्रोत्रं। यत्। ते। क्रूरं। यत्। आस्थितमित्याऽ
स्थितं। तत्। ते। आ। प्यायतां। निः। स्त्यायतां। शुध्यतु।
शं। अहोभ्यऽइत्यहःऽभ्यः। १५। ओषधे। त्रायस्व। स्वधि
तऽइतिस्वऽधिते। मा। एनं। हिंसीः। रक्षसां। भागः। असि।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरस्तमिति निःऽअस्तं । रक्षः ॥ १ ॥ इदं । अहं । रक्षः । अभि ।
तिष्ठामि । अव । बाधे । अधमं । तमः । नयामि ॥ २ ॥ घृतेन ।
द्यावापृथिवी इति द्यावापृथिवी । प्र । ऊर्ण्वाथां । वायो इ
ति वायो । वेः । स्तोकानां । जुषाणः । अग्निः । आज्यस्य । वेतु
स्वाहा । स्वाहाकृते इति स्वाहाऽकृते । ऊर्ध्वनभसमित्यूर्ध्वऽ
नभसं । मारुतं । गच्छतं ॥ ३ ॥ सं । ते । मनः । मनसा । सं । प्राणः ।
प्राणेन । गच्छतां । रेट् । असि । अग्निः । त्वा । श्रीणातु । आपः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५३॥

स्या॥सं अग्निणानूवातस्य॥त्वा॥आज्यैः प्रष्ठः॥२५॥ धै भूमणः
पृषित्॥मरुतृमिति प्रच्युतं॥ द्वेषः॥२२॥ घृतं॥ घृतपाव
न इति घृतऽपावानः॥पिबत॥वसां॥वसापावानं इति वसा
पावानः॥पिबत॥अन्तरिक्षस्य॥हविः॥असि॥स्वा
हा॥२३॥दिशः॥प्रदिश इति प्रऽदिशः॥आदिश इत्या
दिशः॥विदिश इति विऽदिशः॥उद्दिश इत्युत्ऽदिशः॥
दिग्भ्य इति दिक्ऽभ्यः॥स्वाहा॥रैद्रः॥प्राणः॥अंगमंग
मिति अंगंऽअंगं॥निदीत इति निऽदीतः॥रेमं॥इद्गा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५३॥

इयंतऽ आनः। अंगे अंगइ संगे ऽअंगो। नि। दी। २४। दे
वौ। सुहः। भरि। मे। सउंस्तु मित्रिसंऽसौरातु। सत्नश्चो
तिसऽलक्ष्मा। यत्री। विष्णुरूपुर्मि ३ विष्णुऽरूपां। म। वाति
देवत्रेति देवऽत्रा। यंतम्। अवसे। सखाय। अनु। ला
माता। पितरः। मद्रंतु। २५। समुद्रं। गुह्या। स्याहा। देवं
सवितारं। अंतरिक्षं। मित्रावरुणो। अहोरात्रेइ येऽ
रात्रे। घंसं। दंड्रंसि। द्यावापृथिवि इति द्यावाऽपृथिवी।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५४॥

सोमं । युज्यं । नक्षः ॥ दिव्यं । अग्निं । वैश्वानरं । मनः ॥ मे । ता
नीयच्छ ॥ दिवं । ते । धूमः । गच्छतु । अन्तरिक्षं । ज्योतिः ।
पृथिवीं । भस्मना । पृण । स्वाहा ॥ २ ॥ मा । अपः । मा ।
ओषधीः । हिंसीः । धाम्नो धाम्न इति धाम्नः धाम्नः ।
राजन् । ततः । वरुण । नः । मुंच । यत् । आहुः । अघ्न्याः ।
इति । वरुण इति । शपामहे । ततः । वरुण । नः । मुंच ॥ ३ ॥
सुमित्रिया इति सुऽमित्रियाः । नः । आपः । ओषधयः ।

॥५४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतु। दुर्मित्रिया। इति दुःऽमित्रियाः। तस्मै। संतु। यः। अस्मान्।
द्वेष्टि। यं। च। वयं। द्विष्मः॥२८॥ इदं। आपः। प्र। वहत। यत्।
किं। च। दुरितमिति दुःऽइतं। मयि। यत्। वा। अहं। अभि।
दुद्रोहेत्यभिऽदुद्रोह। यत्। वा। शेपे। उत। अनृतं॥२९॥
हविष्मतीः। इमाः। आपः। हविष्मान्। आ। विवासति। हविष्मान्।
देवः। अध्वरः। हविष्मान्। अस्तु। सूर्यः॥३०॥ अग्नेः। वः। अ
पन्नगृहस्येत्यपन्नऽगृहस्य। सदसि। सादयामि। इन्द्राग्न्योः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५५॥

भागधेयीरिति भागऽधेयीः । स्थ । मित्रावरुणयोः । विश्वेषां ।
देवानां । भागधेयीरिति भागऽधेयीः । स्थ ॥२१॥ अमूः । याः ।
उप । सूर्यै । याभिः । वा । सूर्यः । सह । ताः । नः । हिन्वन्तु । अध्व
रं ॥२॥ हृदे । त्वा । मनसे । दिवे । सूर्याय । ऊर्ध्वः । अध्वरं । दि
वि । देवेषु । होत्राः । यच्छ ॥२२॥ सोम । राजन् । विश्वाः । त्वं ।
प्रजा इति प्रऽजाः । उपावरोहेत्युपऽअवरोह । विश्वाः । त्वां ।
प्रजा इति प्रऽजाः । उपावरोहन्त्वित्युपऽअवरोहन्तु ॥२३॥ १५

॥१५६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृणोतु। अग्निः। समिधेति संऽइधा। हवं। मे। शृण्वंतु। आ

पः। धिषणाः। च। देवीः॥ श्रोत। ग्रावाणः। विदुषः। न। यज्ञं।

शृणोतु। देवः। सविता। हवं। मे। स्वाहा॥ ३५॥ देवीः। आपः।

अपां। नपात्। यः। वः। ऊर्मिः। हविष्यः। इंद्रियावान्। इंद्रि

यवानितींद्रियऽवान्। मदिंतमः इति मदिन्ऽतमः॥ ३६॥

तं। देवेभ्यः। देवत्रेति देवऽत्रा। दत्त। शुक्रपेभ्य इति शुक्रऽ

पेभ्यः। येषां। भागः। स्थ। स्वाहा॥ ३७॥ कार्षिः। असि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुद्रस्य । त्वा । अक्षित्यै । उत् । नयामि । सं । आपः । अद्भि
रित्यप्ऽभिः । अग्मत । सं । ओषधीभिः । ओषधीः ॥३॥
यं । अग्ने । पृत्स्विति पृत्ऽसु । मर्त्यं । अवाः । वाजेषु । यं ।
जुनाः । सः । यन्ता । शश्वतीः । इषः । स्वाहा ॥४॥ आ । द
दे । रावा । असि । गभीरं । इमं । अध्वरं । कृधि । इन्द्राय । सु
सुतमं । सुसुतममिति सुऽसुतमं । उत्तमेनेत्युत्ऽतमे
ना । पविना । ऊर्जस्वन्तं । मधुमन्तं । मधुमन्तमिति मधुऽमन्तं । पयस्वन्तं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निग्राभ्याइति निऽग्राभ्याः। स्थ। देवश्रुतइति देवऽश्रुतः। त
र्पयत। मा॥४०॥ मनः। मे। तर्पयत। वाचं। प्राणं। चक्षुः। श्रोत्रं। आ
त्मानं। प्रजामिति प्रऽजां। पशून्। गणान्। गणाः। मे। मा।
वि। तृषन्॥४१॥ इन्द्राय। त्वा। वसुमतइति वसुऽमते। रुद्र
वतइति रुद्रऽवते। आदित्यवतइत्यादित्यऽवते। अभिमाति
घ्नइत्यभिमातिऽघ्ने। श्येनाय। सोमभृतइति सोमऽभृते। अ
ग्नये। रायस्पोषदइति रायस्पोषऽदे॥४२॥ यत्। ते। सोम। दि
वि। ज्योतिः। पृथिव्यां। उरौ। अन्तरिक्षे। तेन। अस्मै। यजमानाय।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुमती। रि। तिमधुमतीः। नः। इषः। रूपि ॥ ७ ॥ यस्मात्। सोम।
॥ ५८ ॥ अनाभ्यो। नाम। आगर्वि। तस्मै। तो। सोम। सोमाय। स्वाहा। स्वाहा। उरू।
उरू। राये। रधि। अधि। दात्रे। वाचः ॥ ४३ ॥ यात्राः। स्थ। यत्र। तुर
तिष्ठ अतुरः। नाधो गृतो इति राधः गृतोः अस्य तस्या पूर्तीः। नाः।
देवीः। देवत्रेति देवत्रा। इमं। यज्ञं। नयत। उपहूता इत्युपहूताः। सोम
स्य। पिबत ॥ ४४ ॥ मा। भेः। मा। सं। विक्थाः। ऊर्जं। धत्स्व। धिष
णे इति धिषणे। वीड्वी इति वीड्वी। सती इति सती। वी। ऊर्जं।
दधाना। पाप्मा। हतः। न। सोमः ॥ ४५ ॥ प्राक्। अपाक्। उदक्। अधराक्।
सर्वतः। त्वा। दिशः। आ। धावन्तु। अम्ब। निः। पर। सं। अरीः। विदां ॥ ४६ ॥
त्व। अगा। नाऽगूं। रोष। देवः। रोविष्ठाः। मत्सीन। यत्। अन्यः। मघव
न्। तिमघवन्। असि। मडिता। इन्द्र। ब्रवीमि। ते। वचः ॥ ४७ ॥
वाचः। पतये। पवस्व। दक्षः। अं...। मित्र...। गभस्ति पू
तः। असि। विश्वेभ्यः। देवेभ्यः। स्वाहा...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वा। अष्टा। स्वाहा। त्वा। स्वभावइतिस्वऽभावः। रूर्पायाऽदेवे
भ्यः। त्वा। मरीचिपेभ्यइतिमरीचिऽपेभ्यः। देवो। अंशुः। यो
इस्य। यःस्तो। पस्मै। त्वा। इत्वेति। तदे [illegible] ऽपरिस्रुते। स्कप
रिऽप्लुता। यंगेन। हतः। असौ। फट्। प्राणाय। त्वा। व्या
नायेति विऽआनाय। त्वा ॥ २ ॥ उपयामगृहीतइत्युप
यामऽगृहीतः। असि। अंतः। यच्छ। मघवन्निति मघऽ
वन्। पाहि। सोमम्। उरुष्य। रायः। आ। इषः। यजस्व।
॥ ६ ॥ अंतरिक्षेऽत। तेन। द्यावापृथिवी इति द्यावापृथि
वी। दधामि। अंतः। दधामि। उरु। अंतरिक्षम्। सजूः
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋतिस्पृऽहः । देवेभिः । अवरैः । परैः । च । अंतर्यामऽइव्यंतः । या । मे ।
मघवन्निति मघऽवन् । मादयस्व । ऽस्दानायस्कृते । आ । ना
य । चौ ॥ ५ ॥ आ । वा । यो इति वायो । १भूष । शुचिपाऽइति शुचि
पाः । ऽप । नः । सहस्रं । ते । नियुत इति निऽयुतः । विश्ववार
ति विश्वऽवार । ऽपोऽस्पपो । ते । अंधेः । मद्यम् । अयामि । य
स्य । देव । दधिषे । पूर्वपेयमिति पूर्वऽपेयम् । वायवे । चौ ॥
ध्य ॥ इंद्रवायू इतींद्रऽवायू । इमे ॥ सुताः । ऽप । प्रयोभिरि
ति प्रयःऽभिः । आ । गतं । इंदवः । वाम् । ऽशंति । हि ॥ वायवे । इं
ज्वायुधयामितींड वायुऽस्वपीं । स्वा । एषेः । ते । योनिः । सजोषौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यामिति सुऽलोकेषः। भ्यां। त्वा॥७॥ अयं। वां। मित्रावरुणा। सुतः। सोमः।
ऋतावृधा। ऋतवृधेत्यृतऽवृधा। मम। इत्। इह। श्रुतं। हवं। मित्रावरु
णा। भ्यां। त्वा॥८॥ राया। वयं। ससवा(ं)सः ससवांस इति ससऽवांसः। मदे
म। हव्येन। देवाः। यवसेन। गावः। तां। धेनुं। मित्रावरुणा। युवं। नः। वि
श्वाहा। धत्तं। अनपस्फुरंतीमित्यनपऽस्फुरंतीं। एषः। ते। योनिः।
ऋतायुभ्यां। ऋतयुभ्यामित्यृतयुऽभ्यां। त्वा॥९॥ या। वां। कशा। मधु
मतीति मधुऽमती। अश्विना। सूनृतावतीति सूनृताऽवती। तया। यज्ञं।
मिमिक्षतं। अश्विभ्यामित्यश्विऽभ्यां। त्वा। एषः। ते। योनिः। माध्वी
भ्यां। त्वा॥१०॥ तं। प्रत्नथेति प्रत्नऽथा। पूर्वथेति पूर्वऽथा। विश्वथे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिष्ठऽथाः। ईमथेतीमऽथा। ज्येष्ठतातिमिति ज्येष्ठऽतातिम्। बर्हिषदं। बर्हिस
दमितिबर्हिःऽसदम्। स्वर्विदमितिस्वःऽविदं। प्रतीचीनं। वृजनं। दोहसे। धु
नि। आशुं। जयंतं। अनु। यासु। वर्धसे। शंडाय। त्वा॥११॥ एषः। ते। योनिः।
वीरतां। पाहि। अपमृष्ट इत्यपऽमृष्टः। शंडः। देवाः। त्वा। शुक्रपाइति शु
क्रऽपाः। प्र। नु। यंतु। अनाधृष्टा। असि। सुवीर इति सुऽवीरः। वीरान्
प्रजनयन्निति प्रऽजनयन्। परि। इहि। अभि। रायः। पोषेण। यजमानं। सं
॥५८॥ जग्मान इति सम्ऽजग्मानः। दिवा। पृथिव्या। शुक्रः। शुक्रशोचिषेति शु ॥५८॥
क्रऽशोचिषा। निरस्त इति निःऽअस्तः। शंडः। शुक्रस्य। अधिष्ठानं।
अधिस्थानमित्यधिऽस्थानं। असि॥१२॥ अच्छिन्नस्य। ते। देव। सो
म। सुवीर्यस्येति सुऽवीर्यस्य। रायः। पोषस्य। ददितारः। स्याम॥ सा। प्रथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा। सप्त॑र्षिति। विश्वयुः। तेविश्वऽवारा। सः। प्रथमः। वरुणः। मित्रः। अग्निः॥
॥१३॥ सः। प्रथमः। बृहस्पतिः। चिकित्वान्। तस्मै। इंद्राय। सुतं। आ। जुहो
त। स्वाहा॥ [illegible] स्वरुतमिति
ष्टतां। पतत्। स्वाहा॥ १४॥ अया। वेनः। चोदयत्। पृश्निगर्भाः इति पृश्निऽ
गर्भाः। ज्योतिर्जरायुरिति ज्योतिःऽजरायुः। रजसः। विमानइति विऽमाने॥
इमं। अपां। संगमइति संऽगमे। सूर्यस्य। शिशुं। न। विप्राः। मतिभिरितिम
तिऽभिः। रिहंति॥ मर्क्कीया। त्वा॥ १५॥ मनः। न। येषु। हवनेषु। तिग्मं। विपः। श
च्या। वनुथः। द्रवंता। आ। यः। शर्याभिः। तुविनृम्णमइति तुविऽनृम्णः। अ
स्या। अश्रीणीत। आदिशामित्याऽदिशां। गभस्तौ॥ १६॥ ए
षः। ते। योनिः। प्रज्ञा इति प्रऽज्ञाः। पाहि। अपमृष्टः इत्यपऽमृ
ष्टः। मर्कः। देवाः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वा। मंथिपा इति मंथिऽपाः। प्र। अनु। यंतु। अनाधृष्टा। असि। सुप्रजा इ
ति सुऽप्रजाः। प्रजा इति प्रऽजाः। प्रजनयन्निति प्रऽजनयन्। परि।
इहि। अभि। त्वा। रायः। पोषेण। यजमानं। संजग्मान इति सम्ऽजा
४ दिवा ग्मानः। दिवि। व्या। मंथी। मंथिशोचिषेति मंथिऽशोचिषा।
निरस्त इति निः। अस्तः। मर्कः। मंथिनः। अधिष्ठानं। अधि
१५८ स्थानमित्यधिऽस्थानं। असि॥ १७॥ ये। देवासः। दिवि। ए ॥१५८॥
कादश। स्थ। पृथिव्यां। अधि। एकादश। स्थ। अप्सुक्षि
त इत्यप्सुऽक्षितः। महिना। एकादश। स्थ। पृथिव्यां। अधि।
एकादश। स्थ। ते। देवासः। यज्ञं। इमं। जुषध्वं॥ १८॥
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आग्रयणः। असि। स्वाग्रयण इति सु ऽ आग्रयणं। पाहि। य
ज्ञं। पाहि। यज्ञपतिमिति यज्ञ ऽ पतिम्॥ १९॥ विष्णुः। त्वां। इ
२ पातु न्द्रियेण। विष्णो। त्वं। पाहि। अभि। सवनानि। पाहि। सोमः। प
वते। सोमः। पवते॥ २०॥ अस्मै। ब्रह्मणे। क्षत्राय। सुन्वते
यजमानाय। इषे। ऊर्जे। अद्भ्य इह सुतेभ्यः। ओषधीभ्यः।
द्यावापृथिवीभ्यां। सुभूतायेति सु ऽ भूताय। ब्रह्मवर्चसा
येति ब्रह्म ऽ वर्चसाय। पवते। विश्वेभ्यः। त्वा। देवेभ्यः। एषः।
ते। योनिः। विश्वेभ्यः। त्वा। देवेभ्यः॥ २१॥ इन्द्राय। त्वा। बृह
द्वत इति बृहत् ऽ वते। वयस्वते। ऽ क्थायुवे। ऽ क्थयुवमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृथा। ध्रुवं। गृह्णामि। यत्। ते। इंद्र। बृहत्। वयः। तस्मै। त्वा। विष्णवे। त्वा। एषः।
ते। योनिः। उक्थेभ्यः। त्वा। २१॥ देवेभ्यः। त्वा। देवायुवं। देवयुवमिति देव
युवं। गृह्णामि। यज्ञस्य। आयुषे। मित्रावरुणाभ्यां। इंद्राय। इंद्राग्निभ्या
मितींद्राग्निऽभ्यां। इंद्राय। इंद्रावरुणाभ्यां। इंद्राबृहस्पतिभ्यामितींद्राबृ
हस्पतिऽभ्यां। इंद्राविष्णुभ्यामितींद्राविष्णुऽभ्यां। त्वा। देवायुवं। देवयुवमि
तिदेवऽयुवं। गृह्णामि। यज्ञस्य। आयुषे॥ २३॥ मूर्धानं। दिवः। अरतिं। ॥१५१॥
१॥ पृथिव्याः। वैश्वानरं। ऋते। आ। जातं। अग्निं। कविं। सम्राजमिति संरा
जं। अतिथिं। जनानाम्। आसन्। आ। पात्रं। जनयंत। देवाः॥ २४॥ ध्रुवः।
असि। ध्रुवक्षितिरिति ध्रुवऽक्षितिः। ध्रुवाणां। ध्रुवतम इति ध्रुवऽ
तमः। अच्युतानाम्। अच्युतक्षित्तम इत्यच्युतक्षित्ऽतमः। एषः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते।योनिः।वैश्वानराय।त्वा॥२५॥ध्रुवं।ध्रुवेण।मनसा।वाचा।सोमं।
अव।नयामि।अथ।नः।इंद्रः।इत्।विशः।असपत्नाः।समनसइतिस
मनसः॥करत्॥२६॥यः।ते।द्रप्सः।स्कंदति।यः।ते।अंशुः।ग्रावच्यु
तइतिग्रावऽच्युतः।धिषणयोः।उपस्थादित्युपऽस्थात्।अध्वर्योः।
वा।परि।वा।यः।पवित्रात्।तं।ते।जुहोमि।मनसा।वषट्कृतमितिवषट्
कृतं।स्वाहा।देवानाम्।उत्क्रमणमित्युत्ऽक्रमणं।असि॥२७॥
मधवे।माधवाय।शुक्राय।शुचये।नभसे।नभस्याय।इषे।ऊर्जे।
सहसे।सहस्याय।तपसे।तपस्याय।अंहस्पतये।अंहसः।पतय
य।अंहसः।पतये।त्वा॥२८॥इंद्राग्नीइतीन्द्राग्नी।आ।गतं।सुतं।गीर्भि
रितिगीःऽभिः।नभः।वरेण्यं।अस्य।पातं।धिया।इषिता।इंद्राग्नि
ष्यामितीन्द्राग्निऽस्यां।त्वा।एषः।ते।

योनिः। इंद्राग्निऽभ्यामितींद्राग्निऽभ्यां। चा॥२१॥ आ। घ। ये। अ
ग्निं। इंधते। स्तृणंति। बर्हिः। आनुषक्। येषां। इंद्रः। युवा। स
खा। अग्नींद्राऽभ्यां। त्या। दृषः। ते। योनिः। अग्नींद्राऽभ्यां॥७०॥
ओमासः। चर्षणीऽधृतः। चर्षणीधृत इति चर्षणिऽधृतः। वि
श्वे। देवासः। आ। गत। दाश्वांसः। दाशुषः। सुतं॥२२॥ विश्वे।
देवासः। आ। गत। शृणुत। मे। इमं। हवं। आ। इदं। बर्हिः। नि। सीद ॥५१॥
५८ त॥२२॥ इंद्र। मरुत्वः। इह। पाहि। सोमं। यथा। शार्याते। अपिबः।
सुतस्य। तव। प्रणीती। प्रनीतीति प्रऽनीती। तव। शूर। शर्म
न्। आ। विवासंति। कवयः। सुयज्ञा इति सुऽयज्ञाः। इंद्राय।
त्वा। मरुत्वते। दृषः। ते।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योनिः । इंद्राय । त्वा । मरुत्वते ॥ ३३ ॥ मरुत्वंतं । वृषभं । वावृधानं । अक
वारिमित्यकऽवारिं । दिव्यं । शासं । इंद्रं । विश्वासाहं । विश्वस
हमिति विश्वऽसहं । अवसे । नूतनाय । उग्रं । सहोदामिति सहः
ऽदां । इह । तं । हुवेम ॥ ३४ ॥ मरुतां । ओजसे । त्वा ॥ ३५ ॥ सजोषा
इति सऽजोषाः । इंद्र । सगण इति सऽगणः । मरुद्भिरिति मरुत्ऽ
भिः । सोमं । पिब । वृत्रहेति वृत्रऽहा । शूर । विद्वान् ॥ जहि । शत्रू
न् । अप । मृधः । नुदस्व । अथ । अभयं । कृणुहि । विश्वतः । नः ॥
॥ ३६ ॥ महान् । इंद्रः । नृवदिति नृऽवत् । आ । चर्षणिप्रा इति च
र्षणिऽप्राः । उत । द्विबर्हा इति द्विऽबर्हाः । अमिनः । सहोभिरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहः॥ त्रिः॥ असमत्र्युक्र्यकू। वावृधे। ववृधइतिववृधे। वीर्याय। उरूः।
रुधुः। सुहृतइति सुऽहुतः। कृत्रे। क्रिरितिकृऽविः। जूतु।
महेऽज्ञायेति महाऽइज्ञाय। च्या। एषः। नेत्यो निः। महेऽज्ञायेति महाऽ
इज्ञाय। च्या॥ ३७॥ महान्। इन्द्रः। यः। ओजसा। पर्जन्यः। वृष्टिमां
नऽइव। वृष्टिमान्इव। स्तोमैः। वत्सस्या। वा
॥६१॥ रुधे। ववृधइतिववृधे॥ ३८॥ इतिपदपाठे सप्तमोऽध्यायः स ॥६१॥
मासः॥ छ॥ छ॥ छ॥ हरिः॥ छ॥ ॐ॥ छ॥ छ॥
॥ आदित्येभ्यः। त्वां। कदा। चन। प्रायुच्छसि। उभे इत्युभे।
निपाहि। जन्मनीइति जन्मनी। तुरीय। आदित्या। सवनं। ते। इं

ड्रियं।आ।तस्थौ।अंमृतं।दिवि।आदिसेभ्यः।द्यौ।२।पूतः।देवानां।
प्रीति।एति।सुम्न।आदि।सास।भवतात्।मृळयंतः।आ।वः।अर्वा
ची।सुमतिरिति।सुऽमतिः।अंहोः।चित्।या।वरिवो।वित्तरेति
वरिवोवित्।तरा।असत्।आदिसेभ्यः।द्यौ।विवस्वान्।आदि
सा।वृषः।ते।सोमपीथइतिसोमऽपीथः।तस्मिन्।मत्स्व।३।श्र
तं।अस्मे।नरः।वच्यसा।दध्यातन।पतु।आशीर्दीया।सीः।दा।
दंपतीइतिदंऽपती।वामं।अश्नुतः।पुमान्।पुत्रः।जायते।विंद
तौ।वसु।अर्घ्यं।विश्वाहा।अरपः।पच्यते।गृहे।४।वामं।अर्घ्यं।
सवितः।वामं।उ।इत्।श्वः।दिवेदिवेइति।दिवेऽदिवे।वामं।अस्मभ्यं।

सावीः। वामस्य। हि। सपस्य। देव। वरेः। अया। धिया। वामभाजइति
वामऽभाजः। स्याम॥ ५॥ सावित्रः। असि। चनोधाइति चनः। धाः। चनः।
मयि। धेहि। जिन्व। यज्ञं। जिन्व। यज्ञपतिमिति यज्ञऽपतिम्। भगाय। सवि
त्रा। चा॥ ६॥ सुशर्मेति सुऽशर्मा। असि। सुप्रतिष्ठानः। सुप्रतिस्थानइ
ति सुऽप्रतिस्थानः। बृहदुक्षायेति बृहत्ऽउक्षाय। नमः॥ ७॥ बृहस्प
तिसुतस्येति बृहस्पतिऽसुतस्य। ते। देवोइंदोइतींदो। इंद्रियावतः। इं
॥१९२॥ द्रियवतइतींद्रियऽवतः। पत्नीवतइति पत्नीऽवतः। ग्रहान्। ऋध्यासं। ॥१९२॥
॥८॥ अहं। परस्तात्। अहं। अवस्तात्। यत्। अंतरिक्षं। तत्। उं
इसं। मे। पिता। आस॥ अहं। सूर्यं। उभयतः। ददर्श। अहं। देवानां।
परमं। गुहा। यत्॥ ९॥ अग्ने। वाक्। पत्नि। सहूरिति सऽहूः।

सोम ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

देवेन । त्वष्ट्रा । सोमं । पिब । स्वाहा ॥१०॥ प्रजापतिरिति प्रजाऽपतिः ।
वृषा । असि । रेतोधा इति रेतः । धाः । रेतः । मयि । धेहि । प्रजापते
रिति प्रजाऽपतेः । ते । वृष्णः । रेतोधस इति रेतः । धसः । रेतोधामि
ति रेतः । धां । अशीय ॥११॥ हरिः । असि । हारियोजन इति हा
रिऽयोजनः । हरिश्रियामिति हरिऽश्रियां । त्वा । हर्योः । स्थानाः ।
स्थ । सहसोमा इति सहऽसोमाः । इंद्राय ॥१२॥ यः । ते । देव ।
सोम । अश्वसनिरित्यश्वऽसनिः । भक्षः । यः । गोसनिरिति गोऽसनिः ।
तस्य । ते । इष्टयजुष इतीष्टऽयजुषः । स्तुतस्तोमस्येति स्तुत । स्तोमस्य ।
शस्तोक्थस्येति शस्तऽउक्थस्य । उपहूत इत्युपऽहूतः । उपहूतस्य

पऽहुतस्य। भक्षयामि॥१३॥ युक्ष्वा। हि। केशिना। हरी इति हरी। वृषणा।
कक्ष्यप्रेति कक्ष्यऽप्रा॥ अथ। नः। इंद्र। सोमपा इति सोमऽपाः। गिरां। उ
पश्रुतिमित्युपऽश्रुतिं। चर॥ इंद्रऽपा। त्वा। षोडशिने। एषः। ते। योनिः।
इंद्राय। त्वा। षोडशिने॥१४॥ आ। तिष्ठ। वृत्रहन्निति वृत्रऽहन्।
रथं। युक्ता। ते। ब्रह्मणा। हरी इति हरी। अर्वाचीनं। सु। ते। मनः।
ग्रावा। कृणोतु। वग्नुना॥१५॥ इंद्रं। इत्। हरी इति हरी। वहतः। अप्र
॥६२॥ तिधृष्टशवसमित्यप्रतिधृष्टऽशवसं। ऋषीणां। च। स्तुतीः। उप। य ॥६२॥
ज्ञं। च। मानुषाणां॥१६॥ यस्मात्। न। जातः। परः। अन्यः। अस्ति।
यः। आविवेशेत्याऽविवेश। भुवनानि। विश्वा। प्रजापतिरिति प्र
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाऽपतिः। प्रजयेति प्रऽजया। सं रराणा इति सं ऽरराणाः। त्रीणि। ज्यो
तींषि। सचते। सः। बोळ्हऽशीः॥ १७॥ इडः। चतुः संस्त्रावेति सं ऽस्रावा। रह
वरुणोः। चार। ऽजौ। तौ। ते। सद्धं। चक्रतुः। अग्रे। घृतं॥ तयोः। अनु
हं। अनु। भक्षं। भक्षयामि। वाक्। देवी। जुषाणा। सोमस्य। तृ
प्येतु। सह। प्राणेन। स्वाहा॥ १८॥ अग्ने। आयूंषि। पवसे। आ।
सुव। ऊर्जं। इषं। च। नः॥ आरे। बाधस्व। दुच्छुनां॥ अग्नये। त्वा।
वर्चसे। एषः। ते। योनिः। अग्नये। त्वा। वर्चसे। अग्ने। वर्चस्विन्। वर्चस्वा
न्। त्वं। देवेषु। असि। वर्चस्वान्। अहं। मनुष्येषु। भूयासं॥ १९॥ अ
ग्ने। पवस्व। स्वपा इति सुऽअपाः। अस्मे इत्यस्मे। वर्चः। सुवीर्यं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिस्रुश्रीयेमोदधुत।रयिं।मयि।पोषं॥२०॥ऽत्तिष्ठंन्निस्रुत्।तिष्ठन्।ओ
जसा।सह।पीत्वी।शिप्रेइतिशिप्रे।अवेपय:।सोमं।इंद्रचम्हइतिचम्ह:
सुतं।इंद्राय।त्वा।ओजसे।एष:।ते।योनि:।इंद्राय।त्वा।ओजसे।इंद्र
ओजस्विन्।ओजस्वान्।त्वं।देवेषु।असि।ओजस्वान्।अहं।मनु
ष्येषु।भूयासं॥२१॥अदृश्रन्।अस्य।केतव:।वि।रश्मय:।ज
नान्।अनु।[redacted]तः।अग्नय:।यथा।सूर्याय।त्वा।भ्राजे।एष:।ते।
योनि:।सूर्याय।त्वा।भ्राजे।एष:।ते।योनि:।सूर्याय।त्वा।भ्राजे।सू
र्य।भ्राजस्विन्।भ्राजस्वान्।त्वं।देवेषु।असि।भ्राजस्वान्।अहं।
मनुष्येषु।भूयासं॥२२॥ऽउत्।उंइति।त्यं।जातवेदसमितिजात

॥६४॥

॥६४॥

तऽवेदसं। देवं। वहंति। केतवः। दृशे। विश्वाय। सूर्यं॥४३॥ चित्रं। देवानां। उत्। अ
गात्। अनीकं। चक्षुः। मित्रस्य। वरुणस्य। अग्नेः॥ आ। अप्राः। द्यावापृथि
वीऽइति द्यावापृथिवी। अंतरिक्षं। सूर्यः। आत्मा। जगतः। तस्थुषः। च॥४४॥
वि। नः। इंद्र। मृधः। जहि। नीचा। यच्छ। पृतन्यतः। यः। अस्मान्। अभिऽदा
सतीत्यभिऽदासति। अधरं। गमय। तमः। इंद्राय। त्वा। विमृधऽइति विऽ
मृधे। एषः। ते। योनिः। इंद्राय। त्वा। विमृधऽइति विऽमृधे॥४५॥ वाचः। प
तिं। विश्वकर्म्माणमिति विश्वऽकर्म्माणं। ऊतये। मनोजुवमिति मनःऽजुवं।
वाजे। अद्य। हुवेम॥ सः। नः। विश्वानि। हवनानि। जोषत्। विश्वशंभूरिति वि
श्वऽशंभूः। अवसे। साधुकर्म्मेति साधुऽकर्म्मा॥ इंद्राय। त्वा। विश्वकर्म्मण
इति विश्वऽकर्म्मणे। एषः। ते। योनिः। इंद्राय। त्वा। विश्वकर्म्मणऽइति विश्वऽ

ति ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्म्मणे ॥ २६ ॥ विश्वकर्मन्नितिविश्वऽकर्मन् । हविषा । वावृधानः । ववृधा
नइतिववृधानः । स्वयं । यजस्व । पृथिवीं । उत । द्यां ॥ मुह्यंतु । अन्ये । अभि
तः । सपत्नाइतिसऽपत्नाः । इह । अस्माकं । मघवेतिमघऽवा । सूरिः ।
अस्तु ॥ २७ ॥ विश्वकर्म्मन्नितिविश्वऽकर्म्मन् । हविषा । वर्द्धनेन । त्रा
तारं । इंद्रं । अकृणोः । अयुध्यं ॥ तस्मै । विशः । सं । अनमंत । पूर्वीः । अयं ।
॥ ६५ ॥ उग्रः । विहव्यइतिविऽहव्यः । यथा । असत् ॥ २८ ॥ अग्नये । सोमाय । गायत्र
छंदसमितिगायत्रऽछंदसं । गृह्णामि । इंद्राय । त्रिष्टुप्छंदसम् । त्रिस्तु ॥ ६५ ॥
प्छंदसमितित्रिस्तुप्ऽछंदसम् । विश्वेभ्यः । देवेभ्यः । जगच्छंदसमिति
जगत्ऽछंदसम् । अनुष्टुभे । अनुस्तुबित्यनुऽस्तुप् । ते । अभिगरइत्य
भिगरः ॥ २९ ॥ वैरीनाम । यापत्नर । आधुनोमि । कुकूननाम ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ोदनाम्।मध्वंतमानामितिमध्वंऽअंतमानाम्।शुक्रं।त्वा।शुक्रे।आ।
जुहोमि।अन्हः।रूपे।सूर्यस्य।रश्मिषु॥२०॥ककुहं।रूपं।वृषभस्य।
रोचते।बृहत्।सोमः।सोमस्य।पुरोगाइतिपुरः।गाः।शुक्रः।शुक्र
स्य।पुरोगाइतिपुरः।गाः।यत्।ते।सोम।अदाभ्यं।नाम।जागृवि।
तस्मै।त्वा।गृह्णामि।तस्मै।ते।सोम।सोमाय।स्वाहा॥२१॥उशिक्।
त्वं।देव।सोम।अग्नेः।प्रियं।पाथः।अपि।इहि।वशी।इंद्रस्य।अस्म
स्वेसु।स्मात्।सखा।त्वं।देव।सोम।विश्वेषाम्।देवानां।प्रियं।पा
थः।अपि।इहि॥२२॥७॥७॥इतिपदपाठेअष्टमोध्यायः।समा
प्तः॥७॥ ॥७॥हरिः॥ॐ॥७॥७॥७॥प्रोपाय।मे।वर्चो

दाइतिवर्चः। दाः। वर्चसे। पवस्व। व्यानायेतिवि। आनाय। ऽदानायेस
तू। आनाय। वाचे॥१॥ कः। हृदयाभ्यां। श्रोत्राय। चक्षुर्भ्यामिति
सा चक्षुः। भ्याम्। मे। वर्चोदाइतिवर्चः। दासौ। वर्चसे। पवेथां॥२॥ आ
त्मने। ~~आत्मने~~। ओजसे। आयुषे। विश्वाभ्यः। मे। प्रजाभ्यइतिप्रऽजा
भ्यः। वर्चोदसाइतिवर्चः। दसौ। वर्चसे। पवेथां॥३॥ कः। असि। क
तमः। कस्य। कः। नाम। असि। यस्य। ते। नाम। अमन्महि। यम्। त्वा
॥ ६६ ॥ सोमेन। अतीतृपाम॥४॥ रूपेण। वः। रूपम्। अभि। आ। अगा ॥ ६६ ॥
म्। तुथः। वः। विश्ववेदाइतिविश्वऽवेदाः। वि। भजतु। ऋतस्य। प
था। प्र। इत। चन्द्रदक्षिणाइतिचन्द्रऽदक्षिणाः॥ वि। स्वः। इतिस्वः।
पस्य। वि। अन्तरिक्षे। यतस्व। सदस्यैः। ब्राह्मणं। अद्य। विदेय।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितृमंतमितिपितृऽमंतम्।पितृमत्।सोमपीतृऽमत्यम्।त्र्यृषिम्।आर्षे
यं।सुधातुदक्षिणमितिसुधातुऽदक्षिणम्॥६॥अस्मद्रातेत्यस्मत्ऽरा
ता।देवत्रेतिदेवऽत्रा।गछ।प्रदातारमितिप्रऽदातारम्॥आ।विश।अग्न
ये।त्वा।मघ।वेहल्लः।दद्दातु।सः।अमृतत्वमित्यमृतऽत्वं।अस्याव॥
॥७॥आयुः।दात्रे।एधि।मयः।मह्यं।प्रतिग्रहीत्रेइतिप्रतिऽग्रहीत्रे।रु
पाया।प्राणः।बृहस्पतये।त्वं।कृ माया।वयः।मयः।मह्यं।प्रतिग्रही
त्रेइतिप्रतिऽग्रहीत्रे॥८॥कः।अदात्।कस्मै।कामः।कामाय।का
मः।दाता।कामः।प्रतिग्रहीतेतिप्रतिऽग्रहीता॥कामः।एतत्।ते।
ते।तव।काम।सता।भुनजोऽहम्॥९॥सम्।इदं।दानः।मनसा।ने
बि।गोभिः।संसृजामि।सिंह ऽभिः।मघवन्नितिमघऽव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ६७ ॥

न्हा । सं । स्व स्त्वा ॥ सं । ब्रह्मणा । देव [illegible] मेति । वऽस्तन भुयत ।ऽऽ
सि । सं । देवानां । सुमतोऽसि [illegible] नो । यज्ञिनाम ॥ १० ॥ भू
ता । रातिः । सविता । इदं । जु [illegible] प्रजापतिरिति प्रजाऽपतिः ।
निधिपा इती निधिऽपाः । दे [illegible] ः । त्वष्टा । विष्णुः । प्रऽजय
ति प्रऽजया । सं ररराणा इति सं [illegible] ररराणः । यजमानाय । द्रवि
णं । दधातु ॥ ११ ॥ सुगेति सुऽगा । वः । देवाः । सदना । अकर्म ।
ये । आऽजग्मेसा । आऽजग्म । इदं । सवनं । जुषाणाः । भरमाणाः ।
वहमानाः । हवींषि । अस्मे इति । धत्त । वसवः । वसूनि ॥
॥ १२ ॥ याना । आ । अवहः । [illegible] तान् [illegible] प्राईर

॥ ६७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या।स्वे।अग्ने।सधस्थइतिसधऽस्थे॥अध्विवाथ्सइतिअध्वि
वाथ्सः।पृथिवाथ्सइतिपृथिवाथ्सः।च।विश्वे।असुं।धर्मम्।
स्वः।आ।तिष्ठत।अनु॥१३॥वयं।हि।त्वा।प्रयतीतिप्रऽयति।
यज्ञे।अस्मिन्।अग्ने।होतारम्।अवृणीमहि।इह॥ऋधक्।
अयाः।ऋधक्।उत।अशमिष्ठाः।प्रजाननितिप्रऽजानन्।आ।
इहि।उप।याहि।विद्वान्॥१४॥यज्ञ।यज्ञं।गच्छ।यज्ञपतिमिति
यज्ञऽपतिम्।स्वां।योनिं।गच्छ।स्वाहा॥एषः।ते।यज्ञ।यज्ञप
तइतियज्ञऽपते।सहसूक्तवाकइतिसह।सूक्तवाकः।सर्ववीर
इतिसर्वऽवीरः।तं।जुषस्व।स्वाहा॥१५॥उरुम्।हि।राजा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरुणः । चकार । सूर्याय । पंथाम् । अन्वेतवा इत्यनुऽएतवै । उं इ
ति । अपदे । पादा । प्रतिऽधातवे । प्रतिधातवा इति प्रतिऽधातवे । अकः । उत ।
अपऽवक्ता । हृदयाविधः । हृदयविध इति हृदयऽ
विधः । चित् । नमः । वरुणाय । अभिऽस्थितः । अभिस्थित इत्य
भिऽस्थितः । वरुणस्य । पाशः ॥ १८ ॥ अग्नेः । अनीकं
अपः । आ । विवेश । अपां । नपात् । प्रतिऽरक्षन् । प्रतिरक्षन्निति प्रतिऽरक्षन् ॥ ६८ ॥
१८ ॥ ॥ असुर्यं ॥ दमेऽदमे इति दमेऽदमे । सम्ऽइधम् । समिधमिति सम्ऽइधम् । यक्षि । अग्ने
असुर्यं प्रति । ते । जिह्वा । घृतं । उत् । चरण्यत् । स्वाहा ॥ ७ ॥ समु
मू द्रात् । हृदयस्य । अप्ऽसु । अंतः । सं । ता । विशंतु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐषध्वीः।ऽत।आपः।।यज्ञस्य।ह्वाम्य... इति यज्ञऽपते।स्तृक्षो
क्षोइति स्तृक्षोऽक्षो।नमोवाक इति।नमः।वाके।विधेम।यत्।
स्वाहा।।१८।।देवीः।आपः।एषः।वः।गर्भः।तं।सुप्रीतमिति
सुऽप्रीतं।सुभृतमिति सुऽभृतं।बिभृतं।देवाः।सोमाय
षः।तो।लोकः।परि।च।वृधि।शं।च।वं।धि।देवानाम्।
समिदिति सम्।इत्।असि।।१९।।एजतु।दश।मास्य इति
दशऽमोऽस्य।गर्भः।जरायुणा।सह।यथा।...
एजति।यथा।समुद्रः।एजति।एव।अयं।दशऽमास्यः
दशऽमास्यः।असत्।जरायुणा।सह।।२०।।यस्यै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्नियः। गर्भः। यस्याः। योनिः। हिरण्ययी। अंगा नि अह्रु
तस्यां। तं। मात्रा। सं। अजीगमं। स्वाहा॥२१॥ पुरुदस्मः इति पु
रुऽदस्मः। विषुरूपः इति विषुऽरूपः। इंदुः। अंतः। महिमा
नं। आनंज। धीरः। एकपदीमित्येकऽपदीम्। द्विपदीमि
ति द्विऽपदीम्। त्रिपदीमिति त्रिऽपदीम्। चतुष्पदीम्। चतुः
॥५९॥ दीमिति चतुःऽपदीम्। अष्टापदीमित्यष्टाऽपदीम्। भुवना ॥५९॥
अनु। प्रथंतां। स्वाहा॥२२॥ मरुतः। यस्य। हि। क्षये। पाथ।
दिवः। विमहस इति विऽमहसः। सः। सुगोपातम इति सुऽ
गोपातमः। जनः॥२३॥ मही। द्यौः। पृथिवी। च। नः। इ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं। यज्ञं। मि। मिक्षतां। पिपृतां। नः। भरीमभिरिति भरीमऽभिः।
॥२४॥ आ। जिघ्र। कलशं। महि। आ। त्वा। विशंतु। इंदवः।
पुनः। ऊर्जा। नि। वर्त्तस्व। सा। नः। सहस्रं। धुक्ष्व। उरुधारेत्यु
रुऽधारा। पयस्वती। पुनः। मा। आ। विशतात्। रयिः॥२५॥ हव्ये। काम्ये।
इडे। रंते। चंद्रे। ज्योते। अदिते। सरस्वति। महि। विश्रुतीति विऽश्रुति॥ एता।
ते। अघ्न्ये। नामानि। देवेषु। मा। सुकृतमिति सुऽकृतं। ब्रूतात्॥२६॥
इहारतिः। [illegible] रम[illegible]। इह। धृतिः। इह। स्वधृतिरिति स्वऽधृतिः। स्वा
हा। उपसृजन्नित्युपऽसृजन्। धरुणं। मात्रे। धरुणः। मातरं। धयन्।
रायः। पोषं। अस्मासु। दीधरत्। स्वाहा॥२७॥ आ। अगन्म। ज्योतिः।
अमृताः। अभूम। दिवं। पृथिव्याः। अधि। आ। अरुहाम। आव

५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धाम। देवान्। स्वः। ऽयोति॥२८॥ ध्रुवं। तं। इं। आ। पर्वता। पुरः। युधेतिपुरः।
युधा। यः। नः। प्रतन्यात्। अपातंतमितितं। मूतं। इद्। तु। हतं। वज्रेण।
त। तमितितं। तुमुं। इद्। तु। हतं॥ दूरे। चत्ताय। छन्त्सत्। गहनं। यत्। इ
नक्षत्। अस्माकं। शत्रून्। परि। शूर। विश्वतः। दर्मा। दर्षीष्ट। विश्व
तः॥२९॥ परमेष्ठी। परमेस्थीतिपरमेस्थी। अभिधीतः इत्यभिऽधी
॥८०॥ तः। प्रजापतिरितिप्रजाऽपतिः। वाचि। व्याहृतायामितिविऽआहृतायां ॥८०॥
म्। अंधः। अच्छेतः इत्यच्छऽइतः। सविता। सन्यां। विश्वकर्मेतिविश्वऽक
र्मा। दीक्षायां। पूषा। सोमक्रयण्यामितिसोमऽक्रयण्यां॥ रु॥ इं
द्रः। च। मरुतः। च। क्रयाय। उपोत्थितः इत्युपऽउत्थितः। असुरः। पण्य
मानः। मित्रः। क्रीतः॥३०॥ विष्णुः। शिपिविष्ट इतिशिपिऽविष्टः। उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रौ।असंन्न इत्या।संन्नः।विष्णुः।नरंधिषः।प्रोह्यमाणः।प्रोह्य
मान इति प्रउड्यमानः।सोमः।आगत इत्या।गतः।वरुणः।
आसुंद्यामिस्या।संद्याम्।आसंन्न इत्या।संन्नः।।२२।।अग्निः।
आग्नीध्रे।इंद्रः।हविर्द्धान इत्ति हविः।धाने।अथर्वोपा
वह्रियमाण इत्युपा।अवह्रियमाणः।विश्वेदेवाः।अंशुषु
न्यूप्यमानेष्विति।न्युप्यमानेषु।।२३।।विष्णुः।आप्रीतपा इत्या।
प्रीतपाः।आप्याय्यमान इत्या।प्याय्यमानः।यमः।सूयमानः।
विष्णुः।संभ्रियमाण इति संभ्रि।यमाणः।वायुः।पूयमानः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्रः। पूतः॥ ४॥ शुक्रः। श्रीः। श्रीरिति श्रिऽश्रीः। मं
थी। सक्तुश्रीरिति सक्तुऽश्रीः। विश्वेदेवाः। चमसेषु उन्नी
तऽइत्युत्ऽनीतः। अंशुः। होमाय। उद्यतऽइत्युत्ऽयतः॥ ३५॥ रुद्रः।
हूयमानः। वातः। अभ्यावृत्तऽइत्यभिऽआवृत्तः। नृचक्षाऽइति नृऽचक्षाः।
प्रतिख्यातऽइति प्रतिऽख्यातः। भक्षः। पीतः। पितरः। नाराशंसः।
॥७१॥ साद्यमानः। सिंधुः। अवभृथायेत्यवऽभृथाय। उद्यतऽइत्युत्ऽ
यतः। समुद्रः। अभ्यवह्रियमाणऽइत्यभिऽअवह्रियमाणः। स ॥८१॥
लिलः। प्रप्लुतऽइति प्रऽप्लुतः॥ ३६॥ ययोः। ओजसा। स्कभिता।
रजांसि। वीर्येभिः। वीरतमेति वीरऽतमा। शविष्ठा। या। पत्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिपसेते।अप्रतीतेसप्रतिऽइतम।सहोभूरिरितिसहः।विः।विष्णु
इतिविष्णुः।अगन्।वरूण्या।पूर्वहूताइतिपूर्वऽहूतौ।।२।।दे
वान्।दिवं।अगन्।यज्ञः।ततः।मा।द्रविणं।अष्टु।मनुष्यान्।
अंतरिक्षं।पितृन्।पृथिवीं।यं।कं।च।लोकं।अगन्।यज्ञः।
ततः।मे।भद्रं।अभूत्।।३।।८।।४।।इतिपदपाठेपंचमोऽध्या
यः समाप्तः।।५।।६।। [illegible] ।।७।।८।।७।।हरिः ॐ।।म
।।७।।देवाः।सवितरितिसवितः।प्रासुव।यज्ञं।प्रासुव।यज्ञपतिं
गायी।दिव्यः।गंधर्वः।केतपाइतिकेतऽपाः।केतं।नः।पुनातु।वाचः।
पतिः।नः।अद्य।वाजं।स्वदतु।।१।।ध्रुवसदमितिध्रुवऽसदं।त्वा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽषदं। नृसदमिति नृऽसदं। मनस्सदमिति मनःऽसदम्। उपयाम
गृहीत इत्युपयामऽगृहीतः। असि। इंद्राय। त्वा। जुष्टं। तमसि। जिहु
ष्टं। ते। योनिः। इंद्राय। त्वा। जुष्टतममिति जुष्टऽतमम्॥२॥ अप्सुषदं।
अप्सुसदमित्यप्सुऽसदं। घृतसदं। घृतसदमिति घृतऽसदम्। व्योम
सदमिति व्योमऽसदम्। पृथिवीसदं। पृथिवीसदमिति पृथि
॥८२॥ विऽसदम्। अंतरिक्षसदमित्यंतरिक्षऽसदम्। दिविसदमि
ति दिविऽसदं। देवसदं। देवसदमिति देवऽसदम्। नाकसदमिति नाकऽस ॥८२॥
दम्॥३॥ अपाम्। रसम्। उद्वयसमित्युत्ऽवयसम्। सूर्ये। संतं।
समाहितमिति समऽआहितम्। अपां। रसस्य। यः। रसः। तं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः।गृह्णामि।उत्तममित्युत्ऽतमम्।।४।।ग्रहाः।ऊर्ज्जाहुतय इत्यूर्ज्जा
ऽआहुतयः।व्यन्तः।विप्राय।मतीम्।तेषाम्।विशिप्रियाणामि
ति विशिऽप्रियाणाम्।वः।अहम्।ऊर्ज्जम्।सम्।अग्रभम्।।५।।संपृ
च इति सम्ऽपृचः।स्थ।सम्।मा।भद्रेण।पृंक्त।विपृच इति वि
ऽपृचः।स्थ।वि।मा।पाप्मना।पृंक्त।।६।।इन्द्रस्य।वज्रः।असि।वा
जसा इति वाजऽसाः।त्वया।अयम्।वाजम्।सेत्।वाजस्य।नु।प्रसव
इति प्रऽसवे।मातरम्।महीम्।अदितिम्।नाम।वचसा।करामहे।
यस्याम्।इदम्।विश्वम्।भुवनम्।आविवेशेत्याऽविवेश।तस्याम्।नः।देवः।
सविता।धर्म।साविषत्।।७।।देवीः।आपः।अपाम्।नपात्।यः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः । ऊर्मिः । प्रत्नूर्त्तिरितिप्रऽनूर्त्तिः । ककुन्मानितिककुत्ऽमान् । वाजसा
इति वाजऽसाः । तेन । अयं । वाजं । सेत् ॥ ८ ॥ अप्सुक्षितः । अंतः । अं
मृ । ते । अप्सुक्षितः । अप्सु । वो । षडजं । अपां । ऊतं । प्रऽगीतिं । कोरितिप्रऽगस्ति ।
क्षिः । अश्वाः । जावेन । वाजिनः ॥ ७ ॥ वातः । वा । वः । मनः । वा । गंध
र्वाः । सप्तविंशतिः । सप्तविंशतिरितिसप्त । विंशतिः । ते । अग्ने । अश्वं । अयुंजन् ।
ते । अस्मिन् । जवं । आ । अदधुः ॥ ९ ॥ वातरंहा इति वातऽरंहाः ॥ ॥८२॥
॥८२॥ भव । वाजिन् । युज्यमानः । इंद्रस्य । तीऽइव । इव । दक्षिणः । श्रिया ।
एधि । युंजंतु । त्वा । मरुतः । विश्ववेदसः इति विश्वऽवेदसः । आ । ते । प
दा । पत्सु इति पत्ऽसु । जवं । दधातु ॥ ११ ॥ जवः । यः । ते । वाजिन् ।

वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निहितइतिनिऽहितः। गुहा। यः। श्येने। परीतइतिपरिऽइतः। अचरत्।
च। वाते। तेन। नः। वाजिन्। बलऽवानितिबलऽवान्। बलेन। वाजजि
दितिवाजऽजित्। च। एधि। समने। च। पारयिष्णुः॥१२॥ वाजिनः।
वाजजितइतिवाजऽजितः। वाजं। सरिष्यंतः। बृहस्पतेः। भागं।
अव। जिघ्रत॥१३॥ देवस्य। वयं। सवितुः। सवे। सत्यसवसइति
सत्यऽसवसः। बृहस्पतेः। उत्तमम्मित्युत्। तमम्। नाकं। रुहेम। इं
द्रस्य। उत्तमम्मित्युत्। तमम्। नाकं। रुहेम। अरुहाम॥१४॥ बृह
स्पते। वाजं। जय। बृहस्पतये। वाचं। वदत। बृहस्पतिम्। वाजं
जापयत॥१५॥ इंद्र। वाजं। जय। इंद्राय। वाचम्। वदत। इंद्रं। वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ जापयत ॥ १६ ॥ एषा । वः । सा । सत्या । संवागिति सं । वाक् । अभूत् । य
या । बृहस्पतिं । वाजं । अजीजपत । अजीजपत । बृहस्पतिं । वाजं । वनस्प
तयः । विमुच्यध्वम् ॥ १७ ॥ देवस्य । वयं । सवितुः । सवे । सत्यसव इति
सत्य सवसः । बृहस्पतेः । वाजजित इति वाज जितः । वाजं । जेष्म ॥ १८ ॥
वाजिनः । वाजं । जेयत । अध्वनः । स्कभ्नुवन्तः । योजना । मिमानाः । का
।८४॥ ष्ठाम् । गच्छत ॥ १९ ॥ एषः । स्यः । वाजी । क्षिपणीम् । तुरण्यति । ग्रीवा
यां । बद्धः । अपिकक्ष इत्यपि । कक्षे । आसनि । क्रतुम् । दधिक्रा इति दध ॥८४॥
धि क्राः । अनु । संतवीत्वदिति सम् । तवीत्वत् । पथाम् । अंकांसि ।
अनु । आपनीफणदित्यापनीफणत् ॥ २० ॥ उत । स्म । अस्य । द्रवतः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुरंण्यतः। पर्णं। न। वेः। अनु। वाति। प्रगर्द्धिन इति प्रऽगर्द्धिनः। श्येनस्ये
वेति श्येनस्य। इव। ध्रजतः। अंकसं। परि। दधिक्राव्ण इति दधिऽक्राव्णः।
सह। ऊर्जा। तरित्रतः ॥२१॥ शं। नः। भवंतु। वाजिनः। हवेषु। देवता
तेति देवऽताता। मितद्रव इति मितऽद्रवः। स्वर्का इति सुऽअर्काः। जंभ
यंतः। अहिं। वृकं। रक्षांसि। सनेमि। अस्मत्। युयवन्। अमीवाः।
॥२२॥ ते। नः। अर्वंतः। हवनश्रुत इति हवनऽश्रुतः। हवं। विश्वे। शृण्वं
तु। वाजिनः। मितद्रव इति मितऽद्रवः। सहस्रसा इति सहस्रऽसाः। मे
धसाताइवेति मेधसाताऽइव। सनिष्यवः। महः। ये। धनं। समिथेष्विति समि
थेषु। जभ्रिरे ॥२३॥ वाजेवाज इति वाजेऽवाजे। अवत। वाजिनः।
नः। धनेषु। विप्राः। अमृताः। ऋतज्ञा इति ऋतऽज्ञाः। अस्य। मध्वः। पि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बत।मादयध्वं।तृप्ताः।यात।पथिभिः।पथिभिरितिपथिऽभिः।देवयानैरितिदेवऽ
यानैः।।१८।।आ।मा।वाजस्य।प्रसवइतिप्रऽसवः।जगम्यात्।आ।इमे
इतीमे।द्यावापृथिवीइतिद्यावापृथिवी।विश्वरूपेइतिविश्वेऽरूपे
आ।मा।गंतं।पितरा।मातरा।युवम्।आ।मा।सोमः।अमृतत्वायेत्य
।७४। मृतऽत्वाय।गम्यात्।।१९।।वाजिनः।वाजजितइतिवाजऽजितः।वाजं।
ससृवांसइतिससृऽवांसः।बृहस्पतेः।भागं।अव।जिघ्रत।निमृ
जानाइतिनिऽमृजानाः।।२०।।आपये।स्वाहा।स्वापयइतिसुऽआप
ये।अपिजायेत्यपिऽजाय।क्रतवे।वसवे।अहर्पतये।अहःपतयइत्यहः
पतये।अन्हे।मुग्धाय।मुग्धाय।वैनंशिनाय।विनंशिनइति
विऽनंशिने।आंत्यायनायेत्यांत्यऽआयनाय।भुवनस्य।पतये।अ
अंत्याय।भौवनाय।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिपतयइत्यधिऽपतये॥१७॥आयुः।यज्ञेन।कल्पतां।प्राणः।चक्षुः।
श्रोत्रम्।पृष्ठं।यज्ञः।यज्ञेन।कल्पताम्॥१८॥जाये।आ।इहि।स्व
रितिस्वः।रोहाव।प्रजापतेरितिप्रजाऽपतेः।प्रजाइतिप्रऽजाः।अ
भूम।स्वः।देवाः।अगन्म।अमृताः।अभूम॥१९॥अस्मेइत्यस्मे।
वः।अस्तु।इंद्रियं।अस्मेइत्यस्मे।नृम्णम्।उत।क्रतुः।अस्मेइत्य
स्मे।वर्चांसि।संतु।वः॥२०॥नमः।मात्रे।पृथिव्यै।इयम्।ते।राट्।
यंता।असि।यमनः।ध्रुवः।असि।धरुणः।कृष्यै।क्षेमाय।रय्यै।
पोषाय॥२१॥वाजस्य।इमम्।प्रसवइतिप्रऽसवः।सुषुवे।सुसुवइति
सुसुवे।अग्रे।सोमम्।राजानम्।ओषधीषु।अप्स्वित्यप्ऽसु।
ताः।अस्मभ्यं।मधुमतीरितिमधुऽमतीः।भवंतु।वयम्।राष्ट्रे।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जागृयाम । पुरोहिताइति पुरःऽहिताः ॥२२॥ वाजस्य । इदं । प्रसवइति प्रऽस
वः । आ । बभूव । इमा । च । विश्वा । भुवनानि । सर्वतः । सनेमिः । राजा ।
परि । याति । विद्वान् । रयिं । पुष्टिं । वर्द्धयमानः । अस्मेइत्यस्मे ॥२३॥
वाजस्य । इमाम् । प्रसवइति प्रऽसवः । शिश्रिये । दिवं । इमा । च । वि
श्वा । भुवनानि । सम्राडिति सम्ऽराट् । अदित्सन्तं । दापयति । प्रजा
॥८५॥ नन् । सः । नः । रयिं । सर्ववीरमिति सर्वऽवीरं । नि । यच्छ
तु ॥२४॥ अग्ने । अच्छ । वद । इह । नः । प्रति । नः । सुमनाइति सुऽमनाः ॥८५॥
भव । प्र । नः । यच्छ । सहस्रजिदिति सहस्रऽजित् । त्वं । हि । धनदाइति
धनऽदाः । असि । स्वाहा ॥२५॥ सोमं । राजानं । अवसे । अग्निं । अन्वारभामह
इत्यनुऽआरभामहे । आदित्यान् । विष्णुं । सूर्यं । ब्रह्माणं । च । बृहस्पतिं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥

॥२६॥ प्र। नः। यच्छतु। अर्यमा। प्र। पूषा। प्र। सरस्वती। प्र। वाक्। देवी।
ददातु। नः॥२७॥ अर्यमणं। बृहस्पतिं। इंद्रम्। दानाय। चोदय।
प वमारं वाचं। विष्णुं। सरस्वतीम्। च। वाजिनं॥२८॥ सरस्वत्यै। वाचः। यन्तुः।
तुर्यै। तुर्यंम। दधामि। बृहस्पतेः। त्वा। सांम्राज्येनेति सांम्ऽराज्ये
न। अभि। सिंचामि। इंद्रस्य। त्वा। सांम्राज्येनेति सांम्ऽराज्येन। अ
भि। सिंचामि॥२९॥ अग्निः। एकाक्षरेणेत्येक। अक्षरेण। प्रा
णं। उत्। अजयत्। तं। उत्। जेषं। अश्विनौ। द्व्यक्षरेणेति द्वि। अ
क्षरेण। द्विपद इति द्विऽपदः। मनुष्यान्। उत्। अजयतां। तान्। उ
त्। जेषं। विष्णुः। त्र्यक्षरेणेति त्रिऽअक्षरेण। त्रीन्। इमान्। लो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प २

कान् । उत् । अजयत् । तान् । उत् । जेषं । सोमः । चतुरक्षरेणेति चतुः । अक्ष-
रेण । चतुष्पदः । चतुःपद इति चतुः । पदः । पशून् । उत् । अजयत् । तान् । उ-
त् । जेषं । ४० ॥ पूषा । पंचाक्षरेणेति पंच । अक्षरेण । पंच । ऋतून् । उ-
त् । अजयत् । तान् । उत् । जेषं । सविता । षडक्षरेणेति षट् । अक्ष-
७६ ॥ रेण । षट् । ऋतून् । उत् । अजयत् । तान् । उत् । जेषं । मरुतः । सप्ता-
क्षरेणेति सप्त । अक्षरेण । सप्त । ग्राम्यान् । पशून् । उत् । अजयत् । ॥ ७६ ॥
तान् । उत् । जेषं । बृहस्पतिः । अष्टाक्षरेणेत्यष्ट । अक्षरेण । गायत्री-
म् । उत् । अजयत् । ताम् । उत् । जेषं ॥ ४१ ॥ मित्रः । नवाक्षरेणेति
नव । अक्षरेण । त्रिवृतमिति त्रिऽवृतम् । स्तोमं । उत् । अजयत् । तं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्। जेषं। वरुणः। दशाक्षरेणेति दश। अक्षरेण। विराजमिति विरा
जम्। उत्। अजयत्। ताम्। उत्। जेषं। इन्द्रः। एकादशाक्षरेणेत्येकादशऽअ
क्षरेण। त्रिष्टुभम्। त्रिस्तुभमिति त्रिऽस्तुभम्। उत्। अजयत्। ताम्। उत्।
जेषं। विश्वे। देवाः। द्वादशाक्षरेणेति द्वादशऽअक्षरेण। जगतीम्।
उत्। अजयन्। ताम्। उत्। जेषं॥ ४२॥ वसवः। त्रयोदशाक्षरेणे
ति त्रयोदशऽअक्षरेण। त्रयोदशमिति त्रयःऽदशम्। स्तोमम्। उत्।
अजयन्। तम्। उत्। जेषं। रुद्राः। चतुर्दशाक्षरेणेति चतुर्दशऽअक्षरे
ण। चतुर्दशमिति चतुःऽदशम्। स्तोमम्। उत्। अजयन्। तम्। उत्। जेषं। आदि
त्याः। पंचदशाक्षरेणेति पंचदशऽअक्षरेण। पंचदशमिति पंचऽदशम्। स्तो
मम्। उत्। अजयन्। तम्। उत्। जेषं। अदितिः। षोडशाक्षरेणेति षोडशऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अक्षरेण । षोडशम् । स्तोमं । उत् । अजयत् । तं । उत् । जेषं । प्रजापतिरिति
प्रजाऽपतिः । सप्तदशाक्षरेणेति सप्तदशऽअक्षरेण । सप्तदशमिति
सप्तऽदशम् । स्तोमम् । उत् । अजयत् । तं । उत् । जेषं ॥ ४२ ॥ ५ ॥ ५ ॥ ५
॥ ५ ॥ [illegible] ॥ ५ ॥ हरिः ॐ ॥ ५ ॥ इति पदपाठे दशमोध्यायः ॥
॥ ५ ॥ वृषः । तु । निर्ऋत्यै । तद् इति निः । ते । भागः । तं । जुषस्व । स्वाहा । अग्नि
भ्य नेत्रेभ्य इत्यग्निऽनेत्रेभ्यः । देवेभ्यः । पुरस्सद्भ्य इति पुरस्सत्ऽभ्यः । यमनेत्रे
७८ ॥ भ्य इति यमऽनेत्रेभ्यः । दक्षिणासद्भ्य इति दक्षिणासत्ऽभ्यः । विश्व ॥ ७८ ॥
देवनेत्रेभ्य इति विश्वदेवऽनेत्रेभ्यः । पश्चात्सद्भ्य इति पश्चात्सत्ऽभ्यः । मि
त्रावरुणनेत्रेभ्य इति मित्रावरुणऽनेत्रेभ्यः । वा । मरुन्नेत्रेभ्य इति मरुत्ऽने
त्रेभ्यः । वा । उत्तरसद्भ्य इत्युत्तरसत्ऽभ्यः । सोमनेत्रेभ्य इति सोम । ने

व६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रेभ्यः।देवेभ्यः।ऽउपरिसभ्यः।ऽउपरिसभ्यइत्युपरिसत्ऽभ्यः।दुव
स्वभ्यइतिदुवस्वत्ऽभ्यः।स्वाहा॥११॥येदेवाः।अग्निनेत्राइत्य
ग्निऽनेत्राः।पुरस्सदइतिपुरःऽसदः।यमनेत्राइतियमऽनेत्राः।
दक्षिणासदइतिदक्षिणाऽसदः।विश्वदेवनेत्राइतिविश्व
देवऽनेत्राः।पश्चात्सदइतिपश्चात्ऽसदः।मित्रावरुणनेत्राइतिमि
त्रावरुणऽनेत्राः।वा।मरुन्नेत्राइतिमरुत्ऽनेत्राः।वा।ऽउत्तरसदइत्युत्त
रा।सदः।सोमनेत्राइतिसोमऽनेत्राः।ऽउपरिसदः।ऽउपरिसदइत्युपरिऽसदः।
दुवस्वन्तः।तेभ्यः।स्वाहा॥१२॥अग्ने।सहस्व।पृतनाः।अभिमातीरि
त्यभिऽमातीः।अप।अस्य।दुस्तरः।दुस्तरइतिदुस्तरः।तरन्।अरातीः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्चः। ध्याः। पूतं वा अहसीति पूत्तऽवाहसि॥ ३॥ ऽपात्वेसाहि रक्षः पा। जुषे सो।
वीर्येण। जुहोमि। हतं। रक्षः। स्वाहा। रक्षसां। त्वा। वधाय। अवधिष्म।
रक्षः। अमुष्य। त्वा। वधाय। अमुं। अवधिष्म। ऽषाणः। अध्वा। आ
ज्यस्य। वेतु। स्वाहा॥ ४॥ अपः। देवीः। मधुमतीरिति मधुऽमतीः।
अगृभ्णन्। ऊर्जस्वतीः। राजस्व इति राजऽस्वः। चितानाः। याभिः।
॥७८॥ मित्रावरुणौ। अभि। असिंचन्। याभिः। इन्द्रम्। अनयन्। अति। अ ॥७८॥
रातीः॥ ५॥ वृष्णः। ऊर्मिः। असि। राष्ट्रदा इति राष्ट्रऽदाः। राष्ट्रम्। मे।
देहि। स्वाहा। वृष्णः। ऊर्मिः। असि। राष्ट्रदा इति राष्ट्रऽदाः। राष्ट्रं। अ
मुष्मै। देहि। वृषसेन इति वृषऽसेनः॥ ६॥ अर्थेतः। स्थ। इतः। ऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽसृतीः। आपः। पृथिवाहिनीः। पृथिवाहिनीरिति पृथिऽवाहिनीः। अपां।
पतिः। अपां। गर्भः। सूर्यवर्चसऽइति सूर्यऽवर्चसः। सूर्यत्वचऽइति सूर्य।
त्वचः। वृतऽक्षितऽइति वृतऽक्षितः। वाशाः। मांदाः। शाक्करीः। जनभृ
तऽइति जनऽभृतः। विश्वभृतऽइति विश्वऽभृतः। शौपीष्ठाः। आ
पः। स्वाराज्ञीः। स्वाराज्ञीरिति स्वऽराज्ञीः। स्थ। राष्ट्रदाऽइति राष्ट्रऽदाः।
राष्ट्रं। अमुष्मै। दत्त। ० सं। मधुमतीरिति मधुऽमतीः। मधुम
तीभिरिति मधुऽमतीभिः। पृच्यतां। महि। क्षत्रं। क्षत्रियाय। वन्वा
नाः। अनाधृष्टाः। सीदत। सह। ओजसा। महि। क्षत्रं। क्षत्रियाय।
दधतीः। ०। सविता। वः। प्रसवानामिति प्रऽसवानां। सुवतां।
अग्निः। गृहपतीनामिति गृहऽपतीनां। सोमः। वनस्पतीनां। २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बृहस्पतिः। वाचे इंद्रः। ज्येष्ठ्याय। रुद्रः। पशूनां। मित्रः। सत्याय। वरुणः।
धर्मपतीनामिति धर्मपतीनाम्॥ ॥ इमं देवाः असपत्नं सुवध्वं।
महते। क्षत्राय। महते ज्येष्ठ्याय। इमं। अमु। अमुष्य पुत्रं। अमुष्यै।
पुत्रं। अस्यै विशे। ७। एष वः। कुरवः। राजा। एष वः पंचालाः।
राजा। सोमः। अस्माकं ब्राह्मणानां। राजा॥ ११ सोमस्य त्वि
षिः। अग्निः। अग्नये। स्वाहा। सोमाय। सवित्रे। सरस्वत्यै। पूष्णे।
॥७१॥ बृहस्पतये। १२। इंद्राय। अंशोषाय। श्लोकाय। घोषाय। नाशी ॥७१॥
याओर्व्यमतो। अनिपदः। शमिता। विऽश्वरूपमोषधिवाचं। बंधु।
तमितार इति तपः ऽञ्जाः। सोमस्य। ... स्वाहा। युङ्क्ष्व
इति राऽऽस्वः। १३। सधमादइति सधऽमादः। द्युम्निनीः।
पत्रे ४

आपः। पूताः। अनाधृष्टाः। अपस्यः। वसानाः। पस्त्यासु। चक्रे। वरुणः।
सधस्थमिति सधऽस्थं। अपां॥ शिशुः। मातृतमास्विति मातृऽतमा
सु। अंतरित्यंतः॥ १४॥ क्षत्रस्य। उल्बं। जरायु। नाभिः। योनिः। इंद्रस्य।
वार्त्रघ्नमिति वार्त्रऽघ्नम्। असि। त्वया। अयं। वृत्रं। वध्यात्। मित्रस्य।
असि। वरुणस्य। असि॥ १५॥ रुजा। दृबा। धृषुपा। पात। एनं। प्रांचं। प्र
त्यंचं। तिर्यंचं। दिग्भ्य इति दिक्ऽभ्यः। पात॥ १६॥ आविः। मर्याः।
आवित्त इत्याऽवित्तः। अग्निः। गृहपतिरिति गृहऽपतिः। इंद्रः। वृद्ध
श्रवा इति वृद्धऽश्रवाः। पूषा। विश्ववेदा इति विश्वऽवेदाः। आवि
त्ताइत्या। वित्तौ। मित्रावरुणौ। धृतव्रताविति धृतऽव्रतौ। आवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेरसा । वित्ते । द्यावो पृथिवी इति द्यावा पृथिवी । विश्वशंभ्वु इति विश्व
शं भ्वे । आ वित्ते सा । वित्ता अदितिः ५ ५ सामैस्य रू ऽसामौ ॥ १७ ॥ अ
वैश्याइ यवऽइष्टाः । दं दम्रूकाः । प्राचीम् आरोह । गायत्री । त्वा । अव
तु । रथंतरमिति रथं तरं । साम । त्रिवृदिति त्रिऽवृत् । स्तोमः । वसंतः ।
ऋतुः । ब्रह्म । द्रविणं ॥ १८ ॥ दक्षिणां । आरोह । त्रिष्टुबिति त्रि स्तु
प् । त्वा । अवतु । बृहत् । साम । पंचदश इति पंचऽदश । स्तो
मः । ग्रीष्मः । ऋतुः । क्षत्रं । द्रविणं ॥ १० ॥ प्रतीचीम् । आरोह । जगती ।
त्वा । अवतु । वैरूपं । साम । सप्तदश इति सप्तऽदशः । स्तोमः । वर्षाः ।
ऋतुः । विट् । द्रविणं ॥ २० ॥ उदीचीम् । आरोह । अनुष्टुप् । अनुस्तुबि
त्यनुऽस्तुप् । त्वा । अवतु । वैराजं । साम । एकविंशइत्येकऽविंशः । स्तो

॥ ८० ॥ ॥ ८० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मः। स्वरत्नुः। ऋतुः। पकृत्नं। इवितं॥ २१॥ ऽ ध्यौं। आ। रोह। पंक्तिः। त्वा। अ
वतु। शाक्वररैवते इति शाक्वररैवते। सामनी इति सामनी। त्रिणवेत्रयस्
त्रिंशौ स्तो। त्रिणवत्रयस्त्रिंशाविति त्रिणवत्रयस्त्रिंशौ स्तो। स्तोमौ।
हेमंतशिशिरौ। ऋतूइ इति। वर्चः। द्रविणं। प्रत्यस्तं। नमुचेः। शिरः॥ २२॥
अस्तं। नमुचेः। शिरः॥ २२॥ सोमस्य। त्विषिः। असि। तव इवेति त
वइइव। मे। त्विषिः। भूयात्। मृत्योः। पाहि। ओजः। असि। सहः। असि। अमृतं। अ
सि॥ २३॥ हिरण्यरूपाइति हिरण्यऽरूपौ। उषसः। विरोके इति विऽरोके
। उभौ। इंद्रौ। उत्। इतः। सूर्यः। च। आ। रोहतं। वरुण। मित्र। गर्तं। ग
तः। चक्षाथां। अदितिं। दितिं। च। मित्रः। असि। वरुणः। असि॥ २४॥
सा सोमस्य। द्युम्नेन। अभि। सिंचामि। अग्नेः। भ्राजसा। सूर्यस्य। व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीसा। इंद्रस्य। इंद्रियेण। मरुतां। ओजसा। क्षत्राणां। क्षत्रपतिः इति क्षत्र
ऽपतिः। त्वं। असि। दिवः। वृषा। हि। जानराज्याय। इति जानऽराज्या
य॥ २५॥ प्र। पर्वतस्य। वृषभस्य। पृष्ठात्। नावः। चरंति। स्वसिच
इति स्वऽसिचः। इयानाः। ताः। आ। अववृत्रन्। अधराक्। उदक्
ताः। अहिं। बुध्न्यं। अनु। रीयमाणाः॥ विष्णोः। विक्रमणं। इति
विऽक्रमणं। विक्रांतं। इति विऽक्रांतं। क्रांतं। असि॥ २६॥ प्रजाप
॥८१॥ ते इति प्रजाऽपते। न। त्वत्। एतानि। अन्यः। विश्वा। रूपाणि। प ॥८१॥
रि। ता। बभूव। यत्कामाः। इति यत्ऽकामाः। ते। जुहुमः। तत्।
नः। अस्तु। वयं। स्याम। पतयः। रयीणां॥ २७॥ इंद्र। यत्।
ते। क्रा। वि। परं। नाम। तस्मिन्। हुते। असि। अमेष्टं। इति अमेऽष्टं।

असि। स्वाहा॥ २८॥ इंद्रस्य। वज्रः। असि। मित्रावरुणयोः। त्वा। प्रशा
स्त्रोरिति प्रऽशास्त्रोः। प्रशिषेति प्रऽशिषा। युनग्मि। अव्यथा
यै। त्वा। स्वधायै। त्वा। अरिष्टः। फल्गुनः। मरुतां। प्रसवेनेति
प्रऽसवेन। जय। आपाम। मनसा। सं। इंद्रियेण॥ २९॥ मा। ते।
ते इंद्र। वयं। तुराषाट्। अयुक्तासः। अब्रह्मता। वि। दसाम। तिष्ठ।
रथं। अधि। यं। वज्रहस्तेति वज्रऽहस्त। आ। रश्मीन्। देव।
युवसे। स्वश्वानिति सुऽअश्वान्॥ ३०॥ अग्नये। गृहपतय इति
गृहऽपतये। स्वाहा। सोमाय। वनस्पतये। इंद्रस्य। इंद्रिया
य। मरुतां। ओजसे। पृथिवि। मातः। मा। मा। हिंसीः। मो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीतिमो। अहं। वयं। [illegible] सीदिति [illegible]
सत्। वसुः। अंतरिक्षसदित्यंतरिक्षऽसत्। होता। वेदिषत्। वेदिसदि
ति वेदिऽसत्। अतिथिः। दुरोणसदिति दुरोणऽसत्। नृषत्। नृ
सदिति नृऽसत्। वरसदिति वरऽसत्। ऋतसदित्यृतऽसत्। व्योम
सदिति व्योमऽसत्। अब्जा इत्यप्ऽजाः। गोजा इति गोऽजाः। ऋत
८२ ॥ जा इत्यृतऽजाः। अद्रिजा इत्यद्रिऽजाः। ऋतं। बृहत्। ॥२॥ यत्। ॥८॥
अग्नि आयुः। अग्ने। आयुः। मे। देहि। पुरु। अग्ने। वर्चः। अग्ने। वर्चः।
मा देहि। ऊर्क्। अग्ने। ऊर्जं। मे। मयि। [illegible] हि। ईडस्य। वां। बाहू इति बा
हू इति बाहू। वीर्यं हरता इति वीर्यऽहरतौ। उपावहरामीत्युपऽअवहरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि॥ २४॥ स्योना। असि। सुषदा। सुसदेति सु ऽ सदा। क्षत्रस्य। योनिः। स्यो
ना। स्योनाम्। आ। सीद। सुषदाम्। सुसदामिति सु ऽ सदाम्। क्षत्रस्य। योनिम्।
आ। सीद॥ २५॥ नि। ससाद। धृतव्रत इति धृत ऽ व्रतः। वरुणः। पस्त्या
सु। आ। साम्राज्यायेति साम् ऽ राज्याय। सुक्रतुरिति सु ऽ क्रतुः॥ २६॥ अभि
भूः। अभिभूरित्यभि ऽ भूः। असि। एताः। ते। पंच। दिशः। कल्प
न्तां। ब्रह्मन्। त्वं। ब्रह्मा। असि॥ २७॥ सविता। असि। सत्यप्रसव इति सत्य
ऽ प्रसवः। वरुणः। सत्यौजा इति सत्य ऽ ओजाः। इंद्रः। विशौजा इति विश ऽ ओजाः। रु
द्रः। सुशेव इति सु ऽ शेवः॥ २८॥ प्रियंकरेति प्रियं ऽ कर। श्रेयस्कर।
श्रेयः करेति श्रेयः ऽ कर। इंद्रस्य। वज्रः। असि। तेन। मे। रध्य॥ २९॥
भूयस्कर। भूयः करेति भूयः ऽ कर॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निः। पृथुः। धर्मणः। पतिः। जुषाणः। अग्निः। पृथुः। धर्मणः। पतिः।
आज्यस्य। हविषः। वेतु। स्वाहा। स्वाहाकृताइति स्वाहाऽकृताः। सूर्य
स्य। रश्मिभिरिति रश्मिऽभिः। यतते। सजातानामिति सऽजाता
नाम्। मध्यमेष्ठाय। मध्यमेस्थायेति मध्यमेऽस्थाय ॥ ३० ॥ स
वित्रा। प्रसवित्रेति प्रऽसवित्रा। सरस्वत्या। वाचा। त्वष्ट्रा। रूपैः। पू
८३॥ ष्णा। पशुभिरिति पशुऽभिः। इन्द्रेण। अस्मे ॥ ४ ॥ बृहस्पतिना। ॥८३॥
ब्रह्मणा। वरुणेन। ओजसा। अग्निना। तेजसा। सोमेन। राज्ञा।
विष्णुना। देवतया। दशम्या। इमं। यज्ञं। विष्णुं। आप्नुवानि ॥ ५० ॥
अश्विभ्यामित्यश्विऽभ्यां। पच्यस्व। सरस्वत्यै। इन्द्राय। सुत्राम्णे इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुऽत्राम्णे। पच्यस्व॥ वायोः। पूतः। पवित्रेण। प्रत्यङ्। सोमः। अतिद्रु
तः। अतिद्रुत इति ऽद्रुतः। इंद्रस्य। युज्यः। सखा॥ ४२॥ कुवित्। अंग। यव
मंतइति यवऽमंतः। यवं। चित्। यथा। दांति। अनुपूर्वमित्यनु
पूर्वं। विऽयूयेति विऽयूय। इहेहेतीहऽइह। एषां। कृणुहि। भो
जनानि। ये। बर्हिषः। नमउक्तिमिति नमःऽउक्तिं। उपयामगृहीतः।
असि। अश्विभ्यामित्यश्विऽभ्यां। त्वा। सरस्वत्यै। इंद्राय। सुत्राम्णइ
ति सुऽत्राम्णे॥ ४३॥ युवं। सुरामं। अश्विना। नमुचौ। आसु
रे। सचा। विपिपानेति विऽपिपाना। शुभः। पती इति पती। इंद्रं। क
र्मस्विति कर्मऽसु। आवतं॥ ४४॥ पुत्रमिवेति पुत्रंऽइव। पितरौ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्विना । इपा । इडं । आवद्धं । काव्यैः । दंसनाभिः ॥ यत । सुरामं
वि । अपिबः । शचीभिः । सरस्वती । त्वा । मघवन्निति मघऽवन् ।
अभिष्णक् ॥ ७८ ॥ ७ ॥ ७४ ॥ इति पदे एकादशोऽध्यायः समा
प्तः ॥ ७ ॥ ७४ ॥ [illegible] ॥ ७ ॥ हरिः ॥ ७ ॥ ७ ॥ ॐ ॥ ७ ॥
युञ्जानः । प्रथमं । मनः । तत्त्वाय । सविता । धियः । अग्नेः । ज्योतिः ।
निचाय्येति निऽचाय्य । पृथिव्याः । अधि । आ । अभरत् ॥ १ ॥ युक्ते
न । मनसा । वयं । देवस्य । सवितुः । सवे ॥ स्वर्ग्याय । शक्त्या ॥ २ ॥ युक्त्वाय । सविता । देवान् । स्वः । यतः । धिया । दिवं
बृहत् । ज्योतिः । करिष्यतः । सविता । प्र । सुवाति । तान् ॥ ३ ॥ युञ्जते
मनः । उत । युञ्जते । धियः । विप्राः । विप्रस्य । बृहतः । विपश्चितः ।
वि । होत्राः । दधे । वयुनावित् । एकः । इत् । मही । देवस्य । सवितुः । परिष्टुतिः ॥ ४ ॥ युजे । वां । ब्रह्म । पूर्व्यं । नमोभिरिति नमःऽभिः । वि । श्लोकः । एतु । पथ्येव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेति पथ्याऽइव। सूरेः। शृण्वंतु। विश्वे। अमृतस्य। पुत्राः। आ। ये। धा
मानि। दिव्यानि। तस्थुः॥५॥ यस्य। प्रयाणं। प्रयाणमिति प्रऽयानं।
अनु। अन्ये। इत्। ययुः। देवाः। देवस्य। महिमानं। ओजसा। यः।
पार्थिवानि। विममे। इति विऽममे। सः। एतशः। रजांसि। देवः।
सविता। महित्वनेति महिऽत्वना॥६॥ देव। सवितरिति सवितः।
प्र। सुव। यज्ञं। प्र। सुव। यज्ञपतिमिति यज्ञऽपतिं। भगाय। दिव्यः। गं
धर्वः। केतपूरिति केतऽपूः। केतं। नः। पुनातु। वाचः। पतिः। वाचं। नः।
स्वदतु॥७॥ इमं। नः। देव। सवितः। यज्ञं। प्र। नय। देवाव्यमिति देव
ऽअव्यं। सखिविदमिति सखिऽविदं। सत्राजितमिति सत्राऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङितं। धनजितमिति धनऽजितं। स्वर्जितमिति स्वःऽजितं। ऋचा। स्तो
मं। अर्द्धय। गायत्रेण। रथंतरमिति रथंऽतरं। बृहत्। गायत्र
वर्त्तनीति गायत्रेऽवर्त्तनि। स्वाहा॥ ७॥ आ। ददे। गायत्रेण। छं
दसा। अंगिरस्वत्। पृथिव्याः। सधस्थादिति सधऽस्थात्। अग्निं
भे पुरीष्यं। अंगिरस्वत्। आ। भर। त्रैष्टुभेन। त्रैष्टुभेनेति त्रैस्तुऽभेन। छं
दसा। अंगिरस्वत्॥ ८॥ अभ्रिः। असि। नारी। असि। त्वया। वयं।
॥८५ अग्निं। शकेम। खनितुं। सधस्थ इति सधऽस्थे। आ। जागतेन। छं
